दैनिकं ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ताः

himsanskritvartah
e-Sanskritnewspaper
नवा प्रेरणा नवोत्साहः

हिमाचलप्रदेशस्य संस्कृतशिक्षकाणां नूतनः प्रकल्पः

■ पृष्ठ-4 ■ वर्ष-3 ■ अङ्क-128

1 29.02.2024 गुरुवासरः वि.सं. २०८० फाल्गुणकृष्णपक्षः पञ्चमी फाल्गुण १७ प्रविष्टांशः

Website- www.himsanskritam.com Email-himsanskrit@gmail.com

-विक्रमादित्यसिंहः मम अनुजः, त्यागपत्रं स्वीकर्तुं किमपि औचित्यं नास्ति - मुख्यमन्त्री सुखविन्दरसिंहसुक्खुः 2



जम्मू-कश्मीरे आतङ्कवादस्य उपरि केन्द्रसर्वकारस्य प्रबलः आक्रमणः, 3



उत्तरकाण्डम्! सप्तमः सर्गः) लब्धवरेण रावणेन लङ्काग्रहणम् 4



## राज्यसभानिर्वाचने पराजस्यानन्तरं हिमाचल प्रदेशस्य-लोकनिर्माण विभागस्य मन्त्री विक्रमादित्य-सिंहः स्वपदात् त्यागपत्रस्य घोषणां कृतवान्



राज्यसभानिर्वाचने पराजस्यानन्तरं हिमाचल-प्रदेशस्य-लोकनिर्माण विभागस्य मन्त्री विक्रमादित्य-सिंहः स्वपदात् त्यागपत्रस्य घोषणां कृतवान्। वार्ताहारैः सह वार्तालापं कुर्वन् सिंहेन प्रोक्तं यत् वर्तमान परिस्थितौ तस्य कृते प्रशासनस्य अङ्गः भवितुं उचितं नास्ति। विक्रमादित्यसिंहः हिमाचल प्रदेशस्य पूर्वमुख्यमंत्री वीरभद्रसिंहस्य पुत्रः शिमला-ग्रामस्यः विधायकः च अस्ति।

## प्रधानमन्त्रिणा नरेन्द्रमोदिना तमिलनाडुराज्ये त्रिशतोत्तर सप्तदशसहस्र कोटि रूप्यकाणां परियोजनानां शुभारम्भः अकारि

**हिमसंस्कृतवार्ताः।** प्रधानमन्त्रिणा नरेन्द्रमोदिना तमिलनाडुराज्ये त्रिशतोत्तर सप्तदशसहस्र कोटि रूप्यकाणां परियोजनानां शुभारम्भः अकारि। प्रधानमंत्रिणा तुत्तुकुडी क्षेत्रे वी.ओ. चिदंबरनार बंदरगाहौ बाह्य हार्बर कंटेनर टर्मिनल इत्यस्य आधारशिला स्थापिता। अस्य टर्मिनलस्य निर्माणेन एतत् बन्दरगाहं पूर्वतटस्य कृते ट्रांसशिपमेण्ट् केन्द्रं भविष्यति, येन भारतं वैश्विकव्यापारे प्रतिस्पर्धा वर्धयितुं स्वतटीयपरिधेः भौगोलिकस्थानस्य च लाभं ग्रहीतुं शक्नोति। अनेन क्षेत्रे वृत्त्यवसराः वर्धिष्यते आर्थिकविकासस्य च वृद्धिः भविष्यति। प्रधानमन्त्रिणा दशराज्येषु केन्द्रशासितप्रदेशेषु च पंचसप्ततिः प्रकाशस्तम्भेषु पर्यटनसुविधानां उद्घाटनं च विधाय वान्ची मनियाच्ची नागरकोइल रेलमार्गस्य तथा मेल्लापलायम् - अरलवायमोलीखण्डस्य च रेलपरियोजनानां आरम्भः विहितः। प्रायः सप्तसप्ततिः उत्तर एकसहस्र कोटिरूप्यकाणां व्ययेन विकसिता एषा परियोजना कन्याकुमारी, नागरकोइल, तिरुनेलवेलीतः चेन्नैनगरं प्रति गच्छतां रेलयानानां यात्रासमयं न्यूनीकर्तुं साहाय्यं प्रदास्यति।



तमिलनाडुराज्ये संपर्कवर्धयितुं, सामाजिक-आर्थिकविकासप्रवर्धनार्थं, क्षेत्रे तीर्थयात्रायाः सुविधायै च प्रायः सार्धं चतुःसहस्र कोटिरूप्यकाणां कुलव्ययेन विकसितानां चत्वारि मार्गपरियोजनानां अपि उद्घाटनं विहितम्। प्रधानमन्त्रिणा नरेन्द्रमोदिना अवसरेऽस्मिन् उदीरितं यत् भारतस्य प्रथमः हाइड्रोजन- इन्धनकोशिका-पोतः गंगा नद्याः माध्यमेन काशी-नगरं यास्यति, तच्च तमिलनाडुराज्यस्य पक्षतः वाराणसी प्रति उपहारः भविष्यति। श्री मोदी अब्रवीत् यत् पदक्षेपोऽयं एकभारतं श्रेष्ठभारतं कार्यक्रमं सुदृढं करोति। सप्तचत्वारिंशदधिक द्विसहस्र वर्षं यावत् भारतं महाशक्तित्वेन वर्धिष्यते।

## प्रधानमन्त्री नरेन्द्रमोदी महाराष्ट्रस्य यवतमालनगरे ४९०० कोटिरूप्यकाणां अधिकमूल्यानां अनेकानाम् आधारभूतसंरचनापरियोजनानां उद्घाटनं शिलान्यास च अकरोत्

प्रधानमन्त्री नरेन्द्रमोदी गतसायंकाले महाराष्ट्रस्य यवतमालक्षेत्रस्य ४९०० कोटिरूप्यकाणां अधिकमूल्यानां अनेकानाम् आधारभूतसंरचना-परियोजनानां उद्घाटनं शिलान्यास च अकरोत्। प्रधानमन्त्री कृषक-सम्मान-निधिः योजनायाः षडदशतमजनसभायां एकविंशतिः सहस्रकोटिरूप्यकाधिकं मूल्यं च विमोचितवान्। श्री मोदी यवतमालस्य महिलानां सार्धपञ्चलक्षं स्वसहायतासमूहानां कृते अपि पञ्चविंशति-अधिक अष्टशतकोटिरूप्यकाणां राशिं वितरितवान्। प्रधानमन्त्रिणा महाराष्ट्रस्य मराठवाडा-विदर्भक्षेत्रयोः लाभाय ५१ सिञ्चनपरियोजनानि अपि राष्ट्राय समर्पितानि। प्रधानमन्त्रिकृषिसिञ्चैयोजना तथा बलिराजा-जलसंजीवनी-योजना अन्तर्गतं २७५० कोटिरूप्यकाधिकमूल्यानां एतासां परियोजनानां कृते ८० सहस्राधिकहेक्टेयरं कृषिभूमिं सिञ्चनान्तरं भविष्यति।

## श्रीमती मुर्मूः गतदिने राच्यां केन्द्रीय-झारखण्ड-विश्वविद्यालस्य तृतीये दीक्षान्त-समारोहे सहभागं भजितवती




राष्ट्रपतिः द्रौपदी-मुर्मूः प्रभृतिः झारखण्ड-ओडिशा-राज्ययोः चतुर्दिवसीय-यात्रार्थं प्रतिष्ठते। श्रीमती मुर्मूः गतदिने राच्यां केन्द्रीय-झारखण्ड-विश्वविद्यालस्य तृतीये दीक्षान्त- समारोहे सहभागं भजितवती। सा ओडिशायाः रायरंगपुरे केंद्रप्रशासनस्य हॉलिडे होम इत्यस्य आधारशिलां च स्थापितवती। राष्ट्रपतिः अन्तर्जालीयमाध्यमेन रायरंगपुरे विभिन्नानां मार्ग परियोजनानां सममेव खेल परिसरानां शिलान्यासं च विधास्यति। राष्ट्रपतिः भुवनेश्वरे च उत्कल-विश्वविद्यालयस्य त्रिपंचाशत्तमे दीक्षांत समारोहे च सहभागं भजिष्यति। राष्ट्रपतिः शुक्रवासरे बिहारस्य भांजा क्षेत्रे बहरामपुर विश्वविद्यालयस्य पंचविंशतिः तमे दीक्षांत समारोहे भागं भजिष्यति।

## गुजराते एकत्रिंशत-सहस्र किलोग्राम-अधिक-मादकद्रव्याणां बृहत्तमं परेषणं निगृहीतम्



भारतीय नौसेना, गुजरात आरक्षिबलाः, नारकोटिक्स कंट्रोल-ब्यूरो इत्यस्य च संयुक्त तत्वाभिधाने एकत्रिंशत-सहस्र किलोग्राम-अधिक मादकद्रव्याणां बृहत्तमं परेषणं निगृहीतम्। केन्द्रीय गृहमन्त्रिणा अमित शाहेन सामाजिक-अर्न्तजाल-माध्यमेन प्रोक्तं यत् प्रधानमन्त्रिणः मादकद्रव्यमुक्त-भारतस्य दृष्टिः अग्रे कृत्वा संस्थाभिः देशे मादक पदार्थानां निगृहणं कर्तुं सफलाः अभवन्। सः अवदत् यत् एन. सी. बी, नौसेना, गुजरात राज्यस्य आरक्षिबलाः इत्येतयोः संयुक्तकार्यक्रमे द्वात्रिंशतोत्तर-एकत्रिंशतशतं किलोग्राम मादक पदार्थस्य परेषणं निगृहीतं देशं मादकपदार्थ मुक्तं कर्तुं प्रशासनस्य अखण्ड-प्रतिबद्धतायाः अपि प्रशंसाम् अकरोत्। सः एतस्योपलब्धतायाः कृते एन. सी. बी. इति, नौसेना, गुजराज राजस्य आरक्षिबलां च अभिनन्दितवान्। निगृहीत वस्तूनि चरसः मेथाम्फेटामाइन, मार्फिन् च सन्ति।

### प्रमुखाः वार्ताः

## सम्पूर्णेपि भारते राष्ट्रीयविज्ञान-दिवसं मानितः

सम्पूर्णेपि भारते राष्ट्रीयविज्ञानदिवसं मानितः। ऐषमवर्षस्य विज्ञानदिवसस्य विषयः "विकसितभारतस्य कृते स्वदेशी तकनीकी " इति वर्तते। अस्य उद्देश्यम् तु भारतस्य भविष्यनिर्माणे स्वदेशी प्रौद्योगिकिनां महत्वस्योपरि बलं अस्ति। प्रधानमन्त्रिणा नरेन्द्रमोदिना राष्ट्रीयविज्ञानदिवसस्योपलक्ष्ये शुभकामना प्रदत्ता। सामाजिकान्तर्जाले प्रधानमन्त्रिणा कथितं यत् अस्माकं प्रशासनं यूनां कृते अनुसन्धानं एवं नवाचारं उत्साहयितुं निरन्तरं प्रयतमानो वर्तते। इदं विकसितभारस्य स्वप्नं साकारयितुं महत्वपूर्णस्थानं बिभर्ति इति आदरणीयेन मोदिना वैज्ञानिकप्रवृत्तिं नवाचारं प्रौद्योगिकं च उद्दिश्य एकं लघुचलचित्रमपि प्रादर्श्यत। महान् भारतीय भौतिकविज्ञानी सर सी वी रमन महोदयस्य उत्कृष्टानुसन्धानस्य रमनप्रभावस्य स्मृतौ नवदेहलीस्थयोः विज्ञानप्रद्योगिकिविभागयोः संयुक्ततत्वाभिधाने एकः कार्यक्रमः समायोजितो वर्तते। अस्यानुसन्धानस्य कृते सी वी रमन महोदयाय त्रिंशत्तोत्तरनवदशशततमे वर्षे सर्वोच्चनोबेलपुरस्कारेण सम्माननं कृतमासीत् राष्ट्रीयविज्ञानदिवसोपलक्ष्ये विज्ञानं एवं प्रौद्योगिकी मन्त्री डा. जितेन्द्र सिंहः कार्यक्रमस्य उद्घाटनं करिष्यति। यत्र विज्ञाने अनुसन्धाननवाचारान्तर्गतानां चयनीकृतनवीनपरियोजनानां बहुविधाःप्रकल्पाः समाविष्टाः भवन्ति

### सुभाषितम्

**शनैः पन्थाः शनैः कन्था**
**शनैः पर्वतलङ्घनम्।**
**शनैर्विद्या शनैर्वित्तं**
**पञ्चैतनि शनैः शनैः॥**

भावार्थ- धीरे-धीरे मार्ग कटता है, धीरे-धीरे कपड़ा सिला जाता है, धीरे-धीरे पहाड़ों की ऊंचाई को पार करना होता है। विद्या और धन भी धीरे-धीरे प्राप्त होते हैं, इसलिए मूलतः ये पांचों काम धीरे ही करने चाहिए। इनमें शीघ्रता श्रेयस्कर नहीं होती। ✍प्रतीकसाठ्ये मुम्बई

**सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुद्धिनां कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति**

कार्यालयः
**हिमसंस्कृतम् प्रकाशनम्**
जसवां कोटला तहसीलपरिसरस्य सम्मुखे कस्बा कोटला, जिला कांगड़ा हि.प्र.
पत्रव्यवहारसङ्केतः- १७७१११

# हिमाचलम्-विक्रमादित्यसिंहः मम अनुजः, त्यागपत्रं स्वीकर्तुं किमपि औचित्यं नास्ति - मुख्यमन्त्री सुखविन्दरसिंहसुक्खुः




हिमसंस्कृतवार्ता- कार्यालयीयः प्रतिनिधिः।
हिमाचलप्रदेशे काङ्ग्रेससर्वकारस्य बहुमतं भवत्यपि राज्यसभायाः आसनं भाजपापक्षे गमनेन राज्ये राजनैतिकक्षोभं तीव्रं जातम्। लोकनिर्माणमन्त्री विक्रमादित्यसिंहः मन्त्रिमण्डलात् त्यागपत्रं दत्तवान्। १५ भाजपा विधायकाः सदनेन निलम्बिताः।

## विक्रमादित्यसिंहः सर्वकारीययानं त्यक्तवान्

मन्त्रिमण्डलात् त्यागपत्रं दत्त्वा विक्रमादित्यसिंहः सर्वकारीयवाहनं त्यक्तवान् अस्ति। सः विधानसभातः निजयानेन स्वनिवासं प्रति प्रस्थितवान्।
त्याग-पत्रस्य पश्चात् भाजपा-दले गमनस्य अनुमानानाम् विषये काङ्ग्रेस-विधायकः विक्रमादित्यसिंहः अवदत् यत् अद्यापि तत्सदृशं किमपि नास्ति। यत्किमपि अहं वदामि तत् सर्वदा तथ्यप्रमाणमाश्रित्य वदामि। तत्सदृशं किमपि नास्ति, सर्वं लोकवादः एव। अहं राजनैतिकं व्यभिचारं विना यत्किमपि वदामि सत्यं वदामि। यत्किमपि वक्तव्यं तत् स्पष्टतया वक्ष्यामि।

## विक्रमादित्यसिंहस्य रोषं निवारयिष्यामः - मुख्यमन्त्री सुखविन्दरसिंहसुक्खुः



मुख्यमन्त्री सुखविन्दरसिंहसुक्खुः उक्तवान् यत् लोकनिर्माणमन्त्री विक्रमादित्यसिंहस्य त्यागपत्रं स्वीकर्तुं किमपि औचित्यं नास्ति। सः अवदत् यत् विक्रमादित्यसिंहः तस्य अनुजः अस्ति। तस्य रोषः दूरीकृतः भविष्यति। मुख्यमन्त्री गुरुवासरे मन्त्रिमण्डलस्य समागमपि आहूतवान्। पत्रकारैः सह वार्तालापं कुर्वन् मुख्यमन्त्री सुखविन्दरसिंहसुक्खुः विक्रमादित्यस्य त्यागपत्रसम्बद्धानां प्रश्नानाम् उत्तरं दत्तवान्। सः विक्रमादित्यसिंहेन सह वार्तालापं कृतवान् इति अवदत् । एतादृशं किमपि नास्ति। सः मम अनुजः अस्ति। अवश्यं यदि कश्चन रोषः भवति तर्हि सः त्यागपत्रं ददाति। तस्य त्यागपत्रस्य स्वीकारस्य न्याय्यता नास्ति । अद्य वयं तेन सह आयव्ययके सत्रे भाषितवन्तः परन्तु तदन्तरे विधानसभाध्यक्षः सदनं आगतः। तस्य यः कोऽपि आक्रोशः अस्ति सः अपसारितः भविष्यति।

## त्याग-पत्रस्य अस्वीकरणे किमुक्तवान् विक्रमादित्यसिंहः

विक्रमादित्यसिंहः मन्त्रिपदात् त्यागपत्रं दत्तवान् परन्तु यदा तस्य त्यागपत्रं न स्वीकृतम् तदा काङ्ग्रेसनेता विक्रमादित्यसिंहः अवदत् यत् एतद् मुख्यमन्त्रिणः विशेषाधिकारः वर्तते। अहं निपीडनं न गृह्णामि किन्तु निपीडनं ददामि। मुख्यमन्त्रिणः परिवर्तनं कर्तव्यं वा न वा इति प्रश्नस्य उत्तरे सः अवदत् यत् एतत् तस्य अधिकारक्षेत्रं नास्ति, दलस्य शीर्षनेतृत्वस्य निर्णयः भविष्यति।

# सर्वकारस्य नैतिकः अधिकारः नष्टः अस्ति : जयरामठाकुरः



**हिमसंस्कृतवार्ता- कार्यालयीयः प्रतिनिधिः।**
हिमाचलप्रदेशस्य विपक्षनेता जयरामठाकुरः अवदत् यत् - अस्य सर्वकारस्य शासने भवितुं नैतिकः अधिकारः नष्टः अस्ति। यावत्पर्यन्तं मया सूचना प्राप्ता यत् मुख्यमन्त्री सुक्खुः अपि स्वस्य त्यागपत्रं प्रदत्तवान् वा शीर्षनेतृत्वेन तस्मै प्रार्थितं वा इति अहं न जानामि। जयरामठाकुरः अवदत् यत् अद्य तत् अभवत् यस्य आशंका आसीत् । प्रातःकाले वयं राज्यपालं मिलितवन्तः आसन्, अस्माभिः उक्तं यत् काङ्ग्रेसस्य बहुमतं आयव्ययकम् पारयितुं नास्ति। एतादृशी परिस्थितौ ते भाजपाविधायकान् निलम्बयिष्यन्ति...। अद्य सदनम् आगतमात्रेण संसदीयकार्याणां मन्त्रिणा प्रस्तावः आनीतः १५ विधानसभासदस्यानां निलम्बनं कर्तुं च आह। वयं मार्शलद्वारा बहिः गन्तुं बाधिताः स्म, अतीव दुर्भाग्यम्। सदनस्य कार्यविधौ यदा वयं बाधां कुर्मः तदा सदनस्य निलम्बनस्य प्रावधानं भवति। वयं चर्चां कर्तुं सज्जाः आसन्।

## सर्वकारस्य रक्षणायनिलंबिताः भाजपाविधायकाः - जयरामठाकुरः

प्रतिपक्षस्य नेता जयरामठाकुरः अवदत्, भाजपायां २५ विधायकाः सन्ति। राज्यसभायां मतदानानन्तरं एषा संख्या ३४ इत्येव वर्धिता । एतेन सर्वकारे महत् संकटम् आगतम्...तेषां कथञ्चित् आयव्ययकम् पारितव्यम् आसीत्, अन्यथा सर्वकारः पतितः स्यात्। अस्य कृते भाजपाविधायकानां संख्यां न्यूनीकर्तुं तस्य एकः एव उपायः आसीत् । अद्य १५ विधायकाः अकारणं निलम्बिताः सन्ति। तेषु विधायकेषु अहम् अपि समाविष्टः अस्मि। १५ विधायकाः निलम्बिताः येन काङ्ग्रेससर्वकारस्य उद्धारः भवेत्। अस्माकं निलम्बनस्य अनन्तरं ते बजटं पारितवन्तः।

# विधानसभायां राजनैतिकनाट्यस्य मध्ये ध्वनिमतेन आयव्ययकम् पारितम्, १५ भाजपाविधायकाः निलम्बिताः

**हिमसंस्कृतवार्ता- प्रवीणः सिरमौरः।** हिमाचलप्रदेशे उच्चोष्णीयराजनैतिकनाटकस्य, विपक्षस्य भारतीयजनतापक्षस्य १५ विधायकानां बजटसत्रात् निलम्बनस्य च मध्ये बुधवासरे विधानसभायाम् आयव्ययकं पारितम्। सत्तापक्षस्य विधायकानां पारमतदानस्य कारणेन राज्यसभानिर्वाचने भाजपाप्रत्याशिनः काङ्ग्रेसस्य प्रत्याशिनः पराजये सति संकटग्रस्तेन काङ्ग्रेससर्वकारेण आयव्ययकस्य पारितत्वेन बहु आश्रयं प्राप्तम्। उल्लेखनीयं यत् राज्यस्य सुखविन्दरसिंहसुक्खुसर्वकारेण दुःखिताः इति कथ्यमानाः षट् काङ्ग्रेसविधायकाः मंगलवासरे भाजपाप्रत्याशी हर्षमहाजनस्य पक्षे पारमतदानं कृतवन्तः, यस्य कारणात् सः च काङ्ग्रेसस्य प्रत्याशी प्रसिद्धः अधिवक्ता अभिषेकमनुसिंघवी इत्यस्य मतं समानसंख्या प्राप्तम्। तदनन्तरं स्खलनेन निर्णयः कृतः यस्मिन् महाजनमहोदयस्य शिरसि विजयस्य मुकुटं स्थापितम्।
बुधवासरे आयव्ययके सत्रे विधानसभायां भाजपायाः विरोधस्य अनन्तरं विधानसभाध्यक्षः कुलदीप पठानिया अवशिष्टसत्रे १५ भाजपासदस्यान् निलम्बितवान्, तदनन्तरं सत्तादलेन स्वरमतेन आयव्ययकम् पारितम्। भाजपा सदस्याः पूर्वं मतविभाजनस्य आग्रहं कृतवन्तः, यत् सभापतिना नाङ्गीकृतम्। पूर्वं मुख्यमन्त्री सुखविन्दरसिंहसुक्खुः मुख्यमन्त्रीपदात् त्यागपत्रं दत्तवान् इति अङ्गीकृतवान् यथा केभ्यः समाचारचैनेलेभ्यः प्रसारितं भवति स्म। सः तत् भाजपायाः 'कुटिलं षड्यंत्रम्' इति उक्तवान् । मुख्यमन्त्री उक्तवान् यत् सः 'योद्धा' अस्ति, अन्त्यपर्यन्तं युद्धं करिष्यति।



मंगलवासरे पारमतदानं कृतवन्तः षट् विद्रोहीकाङ्ग्रेसविधायकाः त्रयः निर्दलीयविधायकाः च बजटसत्रे भागं ग्रहीतुं कठिनसुरक्षायाः मध्यं राज्यराजधानीम् आगतवन्तः, अनन्तरं केन्द्रीय आरक्षितपुलिसबलस्य रक्षणेन भाजपाशासित-हरियाणाप्रदेशस्य पञ्चकुलानगरं पुनः गतवन्तः। सर्वश्रीराजीवशुक्ला, दीपेन्द्रसिंहहुड्डा, डीकेशिवकुमारसहिताः वरिष्ठाः काङ्ग्रेसपर्यवेक्षकाः अपि दलस्य शीर्षनेतृत्वाय स्वप्रतिवेदनं दातुं पूर्वं दलविधायकैः सह एकैकं गोष्ठीं कर्तुं शिमलानगरे सन्ति।

## सिरमौरस्य वनेषु भ्रमन् व्याघ्रः दृष्टः, राजाजी उद्यानात् चतुर्णां राज्यानां सीमां लङ्घ्य पर्वतं प्राप्तवान्



राज्यस्य सिरमौरमण्डलस्य रेणुकाजी वनविभागस्य अन्तर्गतं संगहाड़श्रेण्यां पतितेषु वनेषु व्याघ्रस्य उपस्थितेः पुष्टिः कृता अस्ति। वनविभागः, वन्यजीवविभागश्चापि आश्चर्यचकितः यदा व्याघ्रः स्वतन्त्रतया रेणुकाजीपर्वतं प्राप्तवान् , परन्तु रेणुकाजी वनविभागस्य संगहाड़परिधेः अन्तर्गतं लाजवावनप्रहारस्य अन्तर्गतं एषा व्याघ्रपदयात्रा पञ्जीकृतास्ति । एतत् प्रकरणं चतुर्मासपूर्वं गृहीतविभागीयचित्रग्राह्यकयन्त्रेषु संग्रहीतः अस्ति परन्तु वनविभागः सिरमौरः आश्चर्यचकितः अस्ति यत् राजाजीराष्ट्रियनिकुञ्जात् उत्तराखण्डस्य, उत्तरप्रदेशस्य, हरियाणातः, हिमाचलप्रदेशस्य पर्वतेषु एषः व्याघ्रः आगतः।

# जम्मू-कश्मीरे आतङ्कवादस्य उपरि केन्द्रसर्वकारस्य प्रबलः आक्रमणः, उपत्यकायाः द्वौ संगठनौ प्रतिबन्धितौ



केन्द्रसर्वकारेण जम्मू-कश्मीरस्य द्वयोः संस्थयोः प्रतिबन्धः कृतः। आतङ्कवादीनां जालस्य उपरि दमनं कुर्वन् गृहमन्त्रालयेन मुस्लिमसम्मेलनं जम्मू-कश्मीरं (सुमजी-गुटम्) मुस्लिम-सम्मेलनं जम्मू-कश्मीरं (भाट-गुटं) च अवैधं घोषितम्। गृहमन्त्रालयेन यूएपीए-अन्तर्गतं एतयोः संस्थयोः आगामिपञ्चवर्षेभ्यः प्रतिबन्धः कृतः अस्ति । गृहमन्त्री अमितशाहः स्वयमेव एतां सूचनां सामाजिकमाध्यमे X इत्यत्र दत्तवान्। गृहमन्त्री अमितशाहः लिखितवान् यत् आतङ्कवादीनां जालपुटेषु आक्रमणं कुर्वन् सर्वकारेण मुस्लिमसम्मेलनं जम्मू-कश्मीरं (सुमजी-गुटम्) मुस्लिम-सम्मेलनं जम्मू-कश्मीरं (भाट-गुटं) च अवैध-सङ्गठने घोषिते। शाहमहोदयः अवदत् यत् एते संस्थे राष्ट्रस्य सार्वभौमत्वस्य अखण्डतायाः च विरुद्धं कार्येषु संलग्नौ स्तः। शाहमहोदयः लिखितवान् यत् मोदी-सर्वकारः आतङ्कवादस्य मूलतः उन्मूलनार्थं प्रतिबद्धः अस्ति, अवैधकार्येषु गम्भीरपरिणामानां सम्मुखी कर्तव्यः भविष्यति। ततः पूर्वं मंगलवासरे मोदीसर्वकारेण जमात-ए-इस्लामी-प्रतिबन्धस्य विस्तारः पञ्चवर्षपर्यन्तं कृतः आसीत् । केन्द्रीयगृहमन्त्री अमितशाहः एतां सूचनां दत्तवान् आसीत् । शाहमहोदयेन उक्तं यत् यः कोऽपि देशस्य सुरक्षायाः कृते भयम् अयच्छति तस्य विरुद्धं कठोरा कार्यप्रक्रिया भविष्यति।

# संस्कृतशिक्षामन्त्रिणा संस्कृतनिदेशकः अकादमीसचिवश्च शिवप्रसादखालीवर्यः सेवानिवृत्तेः पूर्वदिवसे सम्मानितः

**डा.धनसिंहरावतः दत्तवान् १०० संस्कृतछात्रेभ्यः चतुःलक्षनवषष्टिसहस्रषट्शतरूप्यकाणां च १७ शोधछात्रेभ्यः षड्लक्षाशीतिसहस्र-रूप्यकाणां छात्रवृत्तिसम्मानम्**



वार्ताहरः-कुलदीपमैन्दोला । राज्यस्तरीयाधुनिकपुस्तकालये ननूरखेडादेहरादूने उत्तराखण्डसंस्कृताकादमीद्वारा बुधवासरे संस्कृतछात्रवृत्तिसम्मानकार्यक्रमः समायोजितोभवत् । यत्रसंस्कृतछात्रवृत्तिसम्मानसमारोहे संस्कृतनिदेशकः च उत्तराखण्डसंस्कृताकादम्याः सचिवः शिवप्रसादखालीवर्यः सेवानिवृत्तेः पूर्वं उत्तराखण्डस्य संस्कृतशिक्षामन्त्रिणा सम्मानितः अभवत् । श्रीखालीवर्येण अवसरेस्मिन् प्रोक्तं यत् अकादमी च सर्वकारः संस्कृतहिताय संस्कृतप्रचाराय प्रसाराय सततं प्रयत्नं कुरुतः । श्रीखालीवर्येण संस्कृतजगतः धन्यवादं कुर्वन् मन्त्रीमहोदयस्य आभारं प्रकटितं। अकादमीसचिवेन अवगतं कारितं यत् बुधवासरे प्रातः १० वादनात् राज्यस्तरीयाधुनिकपुस्तकालये ननूरखेडादेहरादूने कार्यक्रमः सम्पद्यते। छात्तवृत्तिसम्मानार्थं अकादमी इत्यनेन शोधविद्यार्थिविज्ञापनपत्रे विज्ञापितनियमानुसारं राज्यस्य संस्कृतविषये NET इत्युत्तीर्णानां शोधछात्राणां आवेदनानि आमन्त्रितानि आसन्, यस्य फलस्वरूपं बहवः शोधछात्राः आवेदनं कृतवन्तः आसन्। आवेदनप्राप्तेः निर्धारिततिथ्याः अनन्तरम् , 17 शोधछात्राणां आवेदनपत्राणि शोधछात्रवृत्तिचयनसमित्या स्वीकृतानि। समितिद्वारा चयनितानां छात्राणां तथा राज्यस्य सर्वेषु संस्कृतविद्यालयेषु अध्ययनं कुर्वतां अनुसूचितजाति-जनजाति- छात्राणां कृते छात्रवृत्तिः अकादम्या दीयते।



अवसरेस्मिन् मुख्यातिथिरूपेण डा.धनसिंहरावतः १०० संस्कृतछात्रेभ्यः चतुःलक्षनवषष्टिसहस्रषट्शतरूप्यकाणां च १७ शोधछात्रेभ्यः षड्लक्षाशीतिसहस्ररूप्यकाणां छात्रवृत्तिसम्मानम् शुभकामनया सह दत्तवान्। संस्कृतेन अध्ययनं कुर्वत्सु अनुसूचितजाति-अनुसूचितजनजाति-वर्गस्य ५२ छात्राः प्रथमतः उच्चमध्यमवर्गपर्यन्तं (वर्ग-८ तः १२) यावत् ४८ बालिकाछात्राः माध्यमिकसंस्कृतविद्यालयेषु च राज्ये आहत्य १०० छात्राः - चतुःलक्षं नवषष्टिसहस्रषट्शतरूप्यकाणां छात्रवृत्त्या सह राज्यस्य उच्चशिक्षासंस्थासु पञ्जीकृतानां संस्कृतविषयेषु आहत्य १७ शोधछात्राणां कृते नेट् इत्यस्यां परीक्षायां सर्वाधिकम् अंकं प्राप्तुम् षड्लक्षाशीतिसहस्ररूप्यकाणि वार्षिकछात्रवृत्तिः मुख्यातिथिना प्रदत्ता । अकादम्याः कोषाध्यक्षः सत्येन्द्रप्रसादडबरालः समागतानाम् धन्यवादं विहितवान् । अकादम्याः शोधाधिकारी श्री हरीशगुरुरानी च प्रकाशनाधिकारी किशोरीलालरतूडी एवं च गणमान्याः विद्वांशः सम्मानसमारोहस्य शोभां वर्धितवन्तः।

# हिमाचलस्य राजनैतिकसंकटस्य विषये उक्तवती प्रियङ्का गान्धी

**हिमसंस्कृतवार्ताः- शिमला।** काङ्ग्रेसेन उक्तं यत् भारतीयजनतादलं धनशक्तेः सत्तायाः च दुरुपयोगं कृत्वा बहुमतसर्वकारस्य पतनस्य अनैतिकं असंवैधानिकं च प्रयासं कृत्वा हिमाचलप्रदेशस्य जनानाम् अधिकारान् मर्दयितुं प्रयतते। काङ्ग्रेसमहासचिवः प्रियङ्का गान्धी सामाजिक-माध्यमे एकस्मिनपटले उल्लिखितवती यत्, “प्रजातन्त्रे सामान्यजनानां स्वरुच्याः सर्वकारस्य चयनस्य अधिकारः अस्ति। हिमाचलस्य जनाः एतस्य अधिकारस्य उपयोगेन स्पष्टबहुमतेन काङ्ग्रेससर्वकारस्य निर्माणं कृतवन्तः। परन्तु भाजपा केन्द्रस्य धनशक्तिः, संस्था-शक्तिः, केन्द्रस्य सत्तायाः च दुरुपयोगं कृत्वा हिमाचल-जनानाम् एतस्य अधिकारस्य मर्दनं कर्तुम् इच्छति। एतदर्थं भाजपा यथा सर्वकारीयसुरक्षायाः, यन्त्राणां च उपयोगं कुर्वन् अस्ति, तत् देशस्य इतिहासे अपूर्वम् अस्ति” इति।



सा अवदत् यत्, “यदि २५ विधायकैः युक्तं दलम् ४३ विधायकानां बहुमताय आह्वानम् ददाति तर्हि तस्य स्पष्टतया अर्थः अस्ति यत् दलं प्रतिनिधिनां अश्वव्यापारे आश्रितः अस्ति। तेषां एषा मनोवृत्तिः अनैतिकी असंवैधानिकी च अस्ति। हिमाचलस्य देशस्य च जनाः सर्वं पश्यन्ति। प्राकृतिक आपदायां भाजपा राज्यस्य जनैः सह न स्थितवती किन्तु अधुना राज्यं राजनैतिकविपदां प्रति पातयितुं इच्छति” इति।

इदानीं काङ्ग्रेससञ्चारविभागप्रभारी जयरामरमेशः अत्रत्याः दलस्य मुख्यालये पत्रकारसम्मेलने अवदत् यत्, “प्रधानमन्त्रिणं नरेन्द्रमोदिनम् अस्वीकृत्य हिमाचलजनाः काङ्ग्रेसाय स्पष्टं बहुमतं दत्तवन्तः आसन्। यदा वयं अस्माकं प्रतिज्ञां कार्यान्वितुं व्यस्ताः आसन्, तदा मोदीवर्यः स्वस्य प्रतिज्ञां पूर्णां कर्तुं व्यस्तः आसीत्। मोदीवर्यस्य प्रतिज्ञा अस्ति-काङ्ग्रेससर्वकाराः पतन्तु किन्तु जनाः काङ्ग्रेसाय यत् जनादेशं दत्तवन्तः तस्य विश्वासघातं वयं न अनुमन्यन्ते। मोदी-जेपी-नड्डावर्ययोः प्रचारं कृत्वा अपि हिमाचलप्रदेशस्य जनाः राज्ये पूर्णबहुमतेन २०२२ तमस्य वर्षस्य दिसम्बरमासे काङ्ग्रेससर्वकारस्य निर्माणं कृतवन्तः। अस्माकं सर्वकारस्य निर्माणस्य किञ्चित्कालानन्तरं राज्ये भयंकरी आपदा अभवत्। लक्षशः जनाः विस्थापिताः, प्राणहानिः सम्पत्तिः च अभवत् किन्तु केन्द्रसर्वकारः मोदीमहोदयः च किमपि साहाय्यं न अददत्। काङ्ग्रेसपक्षस्य, हिमाचलस्य मुख्यमन्त्रिणः च आग्रहाणाम् अभावे अपि एतत् राष्ट्रिय-आपदं न घोषितम्। “एतत् प्रथमवारं यत् तीव्रप्राकृतिकविपदायाः अनन्तरम् अपि राज्येन केन्द्रसर्वकारेण किमपि साहाय्यं वा आश्रयं वा न प्राप्तम्।”

सः अवदत् यत्, “अस्माकं कृते हिमाचले जनादेशस्य आधारेण राज्यसभासनं निर्धारितं किन्तु दुःखदं यत् भाजपा-अभ्यर्थीनां चयनं लॉटरी- व्यवस्थायाः आधारेण कृतम्। “अस्माकं एकं दलं सम्प्रति शिमलानगरे अस्ति यत् क्रुद्धैः काङ्ग्रेसविधायकैः सह वार्तालापं कृत्वा प्रतिवेदनं प्रस्तौति, येन वयं अस्माकं अग्रे निर्णयं कर्तुं शक्नुमः।”

# नेपाल देशे भारतीयजनेभ्यः पर्यटकेभ्यश्च मनी एक्सचेंज इति रूप्यकानां विनिमये शैथिल्यम्

**हिमसंस्कृतवार्ताः,युवराजभट्टराई**

PhonePe इति तन्त्रेण कर्तुम् अर्हिष्यन्ति अङ्कीयरीत्या धनप्रदानम्। भारतान् नेपालम्प्रति गम्यमानाः भारतीयाः पर्यटकजनाः मनी एक्सचेंज इति समस्यातः मुक्तीकृताः सन्ति। नेपालदेशे PhonePe इति तन्त्रोपागमस्य सौविध्यमस्ति प्रारब्धम्। सम्प्रति साक्षाद्धन प्रदानस्य मनी एक्सचेंज इति भारतीयमुद्राणां नेपालदेशीयरूप्यकैः साकं विनिमयीकरणं च नास्त्यावश्यकम् भारतीयेभ्यः जनेभ्यः। अन्तर्देशीयान्तर्जालीय-व्यापार-सेवा-सञ्चालने ' PhonePe' इत्यस्य दूरभाषीयोपागमतन्त्रस्य आगमनेन साकम् एव पर्यटनार्थं नेपालं गम्यमानाः भारतीयपर्यटकाः अन्यकर्मणा वा नेपालं गम्यमानाः भारतीयाः नागरिकाः PhonePe इत्यस्य तन्त्रस्य QR कूटाङ्क माध्यमेन तत्र आवश्यकेषु स्थलेषु आपणेषु च विक्रेतृजनेभ्यः धनदानसम्बद्ध जनेभ्यः च धनप्रदानं कर्तुम् अर्हन्ति।

# कृषकान्दोलनम्- उपद्रवं जनयन्तानां जनानां पासपोर्ट-वीजाप्रपत्रं च अवरुद्धं भविष्यति- हरियाणासर्वकारः

अस्मिन् समये हरियाणा-सर्वकारः कृषक-आन्दोलने भागं गृह्णन्तानां युवानां कृषकाणां कृते महतं कष्टं सृजति। कारणं यत् ये युवानः कृषकाः शम्भूसीमां प्रति गच्छन्ति चित्रेषु गृहीताः यत्किमपि प्रकारस्य उपद्रवं सृजन्ति, तेषां परिचयं कृत्वा तेषां विरुद्धं कार्यप्रक्रिया कर्तुं सज्जता क्रियते। एतादृशानां जनानां पासपोर्ट्, वीजापत्रं च अवरुद्धं कर्तुं हरियाणा-सर्वकारः सज्जः अस्ति। वस्तुतः हरियाणापुलिसद्वारा सीमायां स्थापितैः विशालैः आईपीटीवी चलचित्रग्राह्यकैः यन्त्रैः, ड्रोन्-चित्रग्राह्यकयन्त्रै च प्रत्येकं मुखं गृहीत्वा तस्य अभिलेखः पासपोर्ट-कार्यालयं प्रति प्रेषयितुं सज्जता क्रियते। हरियाणापुलिसः एतादृशानां सर्वेषां जनानां छायाचित्रं भारतीयदूतावासं प्रति प्रेषयति, येन तेषां पासपोर्ट् वीजापत्रं च प्रतिबन्धितं कर्तुं शक्यते

# ।। श्रीरामायणकथा ।।



## उत्तरकाण्डम्! (सप्तमः सर्गः)
## लब्धवरेण रावणेन लङ्काग्रहणम्

तान् निशाचरान् वरलब्धान् ज्ञात्वा सानुचरः सुमाली भयं त्यक्त्वा रसातलात् उदतिष्ठत्। तस्य सचिवाः मारीचः, प्रहस्तः, विरुपाक्षः, महोदरः च सर्वेऽपि प्रहृष्टाः रसातलात् उदतिष्ठन्। तैः राक्षसपुङ्गवैः सचिवैः वृतः भूत्वा राक्षसः सुमाली दशग्रीवम् अभिगम्य तमालिङ्ग्य वचनम् अब्रवीत् हे वत्स! बहुकालात् मया चिन्तितोऽयं मनोरथः अद्य सम्प्राप्तः यत्त्वं दिष्ट्या त्रिभुवनश्रेष्ठं वरमुत्तमं लब्धवान्। हे महाबाहो! यत्कृते वयं लङ्कां त्यक्त्वा रसातलम् अगच्छाम तद् विष्णुकृतं भयम् इदानीं गतम्।

इयं लङ्का नगरी राक्षसोषिता अस्मदीया आसीत् किन्तु इदानीं तव भ्रात्रा धनाध्यक्षेण निवेशिता वर्तते। यदि हे महाबाहो! इयं लङ्का साम्ना दानेन बलेन वा प्रत्यानेतुं शक्या तर्हि अस्माकं मङ्गलं भवेत्। त्वं च लङ्केश्वरः भविष्यसि इत्यत्र संशयः नास्ति।त्वया राक्षसवंशोऽयं निमग्नोऽपि समुद्धृतः अभवत्। त्वमेव अस्माकं सर्वेषां प्रभुः भविष्यसि। ततः दशग्रीवः उपस्थितं मातामहम् अब्रवीत् हे मातामह! त्वम् ईदृशं वाक्यं वक्तुं न अर्हसि यतः सः धनेश्वरः अस्माकं सर्वेषां गुरुः वर्तते। दशग्रीवस्य चिकीर्षितं ज्ञात्वा तदा राक्षसः सुमाली किमपि न अब्रवीत्। ततः किञ्चित् कालानन्तरं पुनः प्रहस्तः दशग्रीवम् विनीतस्वरेण अब्रवीत् हे महाबाहो! त्वम् ईदृशं वक्तुं नार्हसि। शूराणां सौभ्रात्रं न भवति। तस्य उदाहरणं शृणु।

अदितिः दितिश्च द्वे भगिन्यौ कश्यपस्य परमरूपिण्यौ भार्ये आस्ताम्। अदितिः त्रिभूनेश्वरान् देवान् अजनयत्, दितिः च कश्यपस्य आत्मसम्भवान् दैत्यान् अजनयत्। हे धर्मज्ञ! पुरा इयं सवनार्णवा दैत्यानाम् आसीत् किल! तदानीं दैत्याः अत्यन्तं शक्तिशालिनः अभवन् किन्तु समरे विष्णुना तान् निहत्य त्रैलोक्यमिदं देवानां वशमानीतम्। त्वमेकः एतं विपर्ययं न करिष्यसि। सुरासुरैराचरितं तद् मम वचनं कुरुष्व। प्रहस्तेन एवमुक्तः सः दशग्रीवः किञ्चित् चिन्तयित्वा बाढम् इत्यब्रवीत्। ततः सः वीर्यवान् दशग्रीवः तेनैव हर्षेण तस्मिन् अहनि निशाचरैः सह त्रिकूटशिखरम् अगच्छत्। तत्र गत्वा सः प्रहस्तम् अब्रवीत्- त्वं शीघ्रं लङ्कां गत्वा मम वचसा धनेश्वरं सामपूर्वमिदं वाक्यं ब्रूहि राजन्! त्वया निवेशिता इयं लङ्का पुरा महात्मनां राक्षसानाम् आसीत्। यदि अद्य इयं लङ्का अस्मभ्यं त्वया दीयेत तर्हि अस्माकं प्रीतिर्भवेत्।




हिमसंस्कृतवार्ता, प्रदीपः
pradipnath997@gmail.com


# पहाड़ी गल्लां

## ईसा चक्किया एहड़ा ई पोहणा

कदी ज़मीनां पर मुहन्दे मुंहें
पंजा सालां बाद फेरी समाणा
तांजे मिली जांदी कुर्सी कने कार
तां लोकां ने फेरी सीधे मुंहें नी गलाणा
किसी री सरकार तोड़ना किसी री बणाणा,
पैसा देई कने किसी रा बी मुंह बंद कराणा
जीतणा किसी होरी पार्टिया रे टिकटा पर,
कुर्सिया खातर किसी दुजिया च बड़ी जाणा
अज्ञकल चलन हुई गया एह आम नेत्यां रा,
दल बदलने रा एहड़ा कम्म कमाणा
अपणे देशा प्रदेशा रे बारे च कोई नी सोचदा,
चौबी घंटे ऐई सोच पई किता ते कितना खाणा
सिद्धान्तां री राजनीति हुण कोई नी करदा,
सदनां च भी करनी जुत पत्याहण बड़ा हल्ला पाणा
बड़े अनोखे खेल देखे राजनीतिया रे,
बड़ा आसान आ लोकां जो मूर्ख बणाणा
सरे आम बड़िया बुड़का कने झूठे झूठ गलाणा,
इन्हां ते सच्चा नियाँ कोई दुनियां च एहड़ा जताणा
राजनीति बणी गई हुण पैसा कमाणे री मशीन,
कोई कुछ नी करी सकदा ईसा चक्किया एहड़ा ई पोहणा




रवींद्र कुमार शर्मा
घुमारवी
जिला बिलासपुर हि०प्र०


# धारावाहिकी गीताप्रश्नोत्तरी-४



**श्रीकृष्णः**:- अर्जुन! त्वयि शूरवीरे सहसा एतादृशी दुःस्थितिः कुतः समागता? अत्र स्थातुमपि असमर्थः असि त्वं, किमर्थं वा? एतदतिरिक्तं त्वयि अन्यत् किं जातम्? उच्यताम्।

**अर्जुनः**:- हे केशव! शकुनानि अपि विपरीतानि एव पश्यामि। रणभूमौ कुटुम्बिनः हत्वा कः लाभः स्यात्?

**श्रीकृष्णः**:- एतान् दुष्टान् अहत्वा राज्यमपि त्वं कथं प्राप्स्यसि?

**अर्जुनः**:- हे कृष्ण! राज्यं, विजयं, सुखञ्च न किमपि इच्छाम्यहम्। राज्येन भोगैर्वा जीवितेन किम्?

**श्रीकृष्णः**:- अर्जुन! विजयादीनि त्वं किमर्थं नेच्छति ? किं कारणं तत्र?

**अर्जुनः**:- गोविन्द! वयं पाण्डुपुत्राः यदर्थे राज्यं, सुखानि, भोगान् च प्राप्तुम् इच्छामः, तदर्थे हि एते सर्वे कुटुम्बिनः प्राणेच्छां, धनेच्छां च परित्यज्य युद्धे मरणार्थं समुद्यताः दृश्यन्ते।

**श्रीकृष्णः**:- के सन्ति ते?

**अर्जुनः**:- एते हि आचार्याः, पितरः, पुत्राः, पितामहाः, मातुलाः, श्वशुराः, पौत्राः, श्यालाः तथा च अन्येऽपि बहवः सम्बन्धिनश्च विराजन्ते अत्र।

**श्रीकृष्णः**:- यदा ते हि त्वां हन्तुम् उद्यताः, तदा त्वं किं करिष्यसि?

**अर्जुनः**:- एते माम् अवश्यं हन्युः, परन्तु हे गोविन्द! किं पुनः पृथिव्याः राज्यार्थमेव, अपितु त्रैलोक्यराज्यार्थमपि एतान् हन्तुं नेच्छामि अहं कदाचिदपि।

**श्रीकृष्णः**:- धनञ्जयः! राज्ये प्राप्ते सति तु महत् सुखप्रसन्नतादिकं भवति, तर्हि किं त्वं राज्यसुखमपि न वाञ्छसि?

**अर्जुनः**:- नहि जनार्दन! एतान् स्वकीयान् सम्बन्धिनः, धार्तराष्ट्रान् हत्वा अस्माकं का प्रसन्नता भवेत्? एतान् आततायिनः हत्वा तु अस्मासु पापमेव आश्रयेत्। अतः एतान् स्वजनान् हन्तुं वयं नेच्छामः। यतोहि एतेषां हननेन वयं कथं वा सुखिनः भवेम?

**श्रीकृष्णः**:- त्वं पृष्ठतः अपसरसि नु, परन्तु एते त्वां हन्तुम् एव उद्यताः सन्ति। एतत् कथं स्वीकर्तुं शक्यते त्वया?

**अर्जुनः**:- हे माधव! यद्यपि एते विवेकरहिताः दुर्योधनादयः कुलनाशदोषान्, मित्रद्रोहापराधं न पश्यन्ति, तथापि वयं तद्दोषान् जानन्तः अस्मात् पापकार्यात् कथं वा न अपसरामः इति।

(गीता - १/३१-३९) (अनुवर्तिष्यते)

# किमर्थं माहेश्वर-सूत्राणाम् उपदेशः?





श्री. अभिजित् तोडकरः सुभाषितशिक्षणप्रमुखः
संस्कृतभारती, पश्चिममहाराष्ट्रप्रान्तः


लौकिकभाषायां यः अकारादीनां वर्णानाम् अ ,आ,इ,ई एवम् आनुपूर्व्येण उपदेशः प्राप्यते सः मातृकापाठः इति कथ्यते। तथापि पाणिनिना यानि माहेश्वरसूत्राणि रचितानि तेषु एषः वर्णक्रमः पूर्णतया परिवर्त्य दत्तः अस्ति। अतः एतस्य वर्णोपदेशस्य प्रयोजनं किम् इति प्रश्नः उदेति।

-दीर्घप्लुतानामप्युपदेशः – माहेश्वरसूत्रेषु अइउलृ इत्यादीनाम् उपदेशः कृतः अस्ति तथैव तेषाम् उदात्त-अनुदात्त-स्वरितरूपाणाम् उपदेशः इष्टः। सूत्रेषु अननुनासिकवर्णानामेवोपदेशः दृश्यते अतः तेषाम् अनुनासिकरूपाण्यपि अपेक्षितानि। तथैव सूत्रेषु केवलं ह्रस्वस्वराणाम् उपदेशः दृश्यते। स्वराणां दीर्घप्लुताः अपि इष्यन्ते। पतञ्जलिराह –नैष दोषः यतः आकृत्युपदेशात् सिद्धम्। सूत्रेषु कृतः वर्णोपदेशः आकृतिं (जातिं) दर्शयति। तथा हि अ इत्युक्ते अत्वरूपा जातिः प्रतीयते तेन च अकारस्य अष्टादशभेदानामपि ज्ञानं भवति। एतस्मिन् पुनः आक्षिप्यते – आकृत्युपदेशात् सिद्धमिति चेत् संवृतादीनां प्रतिषेधः। यदि आकृतिरूपः वर्णनिर्देशः कृतः तर्हि सा वर्णजातिः वर्णानां दोषयुक्तोच्चारणे अपि भवत्येव। अतः तेषां दोषाणां प्रतिषेधः वक्तव्यः भवेत्। ते आहत्य अष्टादश स्वरदोषाः भवन्ति।

उत्तरार्थं पतञ्जलिः त्रीणि प्रयोजनानि प्रस्तौति–

**अ) वृत्तिसमवायार्थः उपदेशः।**

वृत्तिः = शास्त्रस्य प्रवृत्तिः प्रवर्तनम्। समवायः= वर्णानाम् आनुपूर्व्येण सन्निवेशः स्थापनम्। वृत्तिसमवायः इति समासः त्रिधा विग्रहीतुं शक्यः।

१) वृत्तये समवायः –वर्णानाम् विशिष्टानुपूर्व्येण कथनं (समवायः) अण् अच् इक् आदीनां प्रत्याहाराणां निर्माणार्थम्। प्रत्याहारसाधनात् 'इको यणचि' इत्यादीनां सूत्राणां निर्मितिः शक्या भवति। एवं 'इको यणचि' इत्यादिरूपस्य लघुरूपशास्त्रस्य प्रवर्तनं शक्यं भवेत् इत्यर्थं वर्णसमवायः उक्तः अस्ति। अन्यथा 'इको यणचि' इति शास्त्रम् 'इउऋलृवर्णानां यवरलाः अइउऋलृएओऐऔवर्णेषु' एवं अतिगुरु सूत्रं वक्तव्यम् अभविष्यत्।

२) वृत्त्यर्थः समवायः- - वृत्तिश्च सा समवायश्च। वर्णानाम् आनुपूर्व्येण विशेषोपदेशः शास्त्रस्य प्रवर्तनाय कृतः अस्ति। अतः समवायः शास्त्रप्रवर्तनरूपः एव।

३) वृत्तिप्रयोजनः समवायः -- प्रयोजनशब्दे यः ल्युट् सः कर्मबोधकः। अतः तस्यार्थः प्रयोज्यः इति भवति। वृत्तिप्रयोज्यः समवायः। वृत्त्या प्रयोज्यः समवायः इति विग्रहः। शास्त्रस्य प्रवृत्त्या एव एषः समवायः निर्मितः अस्ति इत्यर्थः। अथवा ल्युट् कर्त्रर्थेपि युज्यते। वृत्तिप्रयोजनः = वृत्तेः प्रयोजकः समवायः। शास्त्रस्य प्रवर्तकः इति। उपदेशशब्दे यः दिश्-धातुः सः उच्चारणार्थः। अतः उपदेशशब्दस्यार्थः पाणिनिना आचार्येण कृतम् उच्चारणम्। व्याकरणशास्त्रस्य नाम तस्य सूत्राणां प्रवर्तनं भवतु इति धिया पाणिनिराचार्यः माहेश्वरसूत्रेषु वर्णानाम् एवंविधेन आनुपूर्व्येण उपदेशं कृतवान् इत्येवं वार्त्तिकस्य फलितार्थः।

आ) अनुबन्धकरणार्थश्च – अनु पश्चात् बध्यते संसक्तो भवतीति अनुबन्धः। अणादयः ये प्रत्याहाराः सूत्रनिर्मित्यर्थं पाणिनिना निर्मिताः तेषु उच्चारितप्रध्वंसी इत्संज्ञको वर्णः अनुबन्धः। ते अनुबन्धाः भवन्तु इत्यर्थं पाणिनिः वर्णसमवायम् उपदिष्टवान्।

इ) इष्टबुद्ध्यर्थश्च – शास्त्रनिर्माणाय वर्णानां ज्ञानं भवतु इत्येतत् इष्टम्। वर्णानाम् उपदेशात् ऋते तादृशाः इष्टवर्णाः ज्ञातुं न शक्यन्ते। अतः पाणिनिः वर्णसमवायं कृतवान्। **अत्र तृतीयप्रयोजनविषये आक्षेपः–** इष्टबुद्ध्यर्थश्चेति चेदुदात्तानुदात्तस्वरितानुनासिक

क्रमशः..........अग्रिमे दिने